१. 'नापि पदार्थान्तरम्, सर्वस्य पदार्थान्तरस्य साकल्यरूपताप्रसङ्गात्, तथा च तत्सद्भावे सर्वत्र सर्वदा सर्वस्यार्थोपलब्धिरिति सर्वः सर्वदर्शी स्यात्। ततः कारकसाकल्यस्य स्वरूपेणासिद्धेः, सिद्धौ वा ज्ञानेन व्यवधानान्न प्रामाण्यम्।'—प्रमेयक० पृ० १३।

† अस्येदं तात्पर्यम्—कारकसाकल्यस्याबोधस्वभावस्याज्ञानरूपत्वेन स्वपरज्ञानकरणे साधकतमत्वाभावान्न प्रमाणत्वम्। अतिशयेन साधकं साधकतमम्, साधकतमं च करणम्। करणं खल्वसाधारण कारणमुच्यते। तथा च सकलानां कारकाणां साधारणासाधरणस्वभावानां साकल्यस्य—परिसमाप्त्या सर्वत्र वर्तमानस्य सामस्त्यस्य—कथं साधकतमत्वमिति विचारणीयम्। साधकतमत्वाभावे च न तस्य प्रमाणत्वम्, स्वपरपरिच्छित्तौ साधकतमस्यैव प्रमाणत्वघटनात् इति।

---

1. 'कृतः' पाठः।

[यौगाभिमतस्य संनिकर्षस्य प्रामाण्यनिरासः—]

§ १३. नापि संनिकर्षः[1] प्रमाणम्, तस्याप्यव्यभिचारादिविशे-

---

१. तुलना—'तत्र हि संनिकर्ष एवार्थोपलब्धौ साधकतमत्वात्प्रमाणम् । साधकतमत्वं हि प्रमाणत्वेन व्याप्तं न पुनर्ज्ञानत्वमज्ञानत्वं, संशयादिवत्, प्रमेयार्थवच्च । तच्चार्थोपलब्धौ संनिकर्षस्यास्त्येव । न ह्यसंनिकृष्टेऽर्थे ज्ञानमुत्पत्तुमर्हति, सर्वस्य सर्वत्रार्थे तदुत्पत्तिप्रसंगात् ।'—न्यायकु० पृ० २८। 'उपलब्धिहेतुः प्रमाणम्'''' यदुपलब्धिनिमित्तं तत्प्रमाणम् ।''''अकरणा प्रमाणोत्पत्तिरिति चेत्,''''न, इन्द्रियार्थसन्निकर्षस्य करणभावात्''''साधकतमत्वाद्वा न प्रसंगः ।'—न्यायवा० पृ० ५–६। 'ननु संनिकर्षात्रिगमे किं प्रमाणम् ? व्यवहितानुपलब्धिरिति ब्रूमः। यदि हि असंनिकृष्टमपि चक्षुरादीन्द्रियमर्थं गृह्णीयाद् व्यवहितो ततोऽर्थ उपलभ्येत ।''''इन्द्रियाणां कारकत्वेन प्राप्यकारित्वात् । संसृष्टं च कारकं फलाय कल्पते इति कल्पनीयः संसर्गः ।''''कारकं च अप्राप्यकारि च इति चित्रम् ।'—न्यायमं० पृ० ७३ तथा ४७९। अत्र जैनानामुत्तरपक्षः—'तस्यार्थप्रमितौ साधकतमत्वासंभवात् । यद्भावे हि प्रमितेर्भाववत्ता यदभावे चाभाववत्ता तत्तत्र साधकतमम् । 'भावाभावयोस्तद्वत्ता साधकतमत्वम् ।' इत्यभिधानात् । न चैतत् संनिकर्षे संभवति तस्मिन् सत्यपि क्वचित्प्रमित्यनुपपत्तेः । आकाशादिना हि घटवत् चक्षुषः संयोगो विद्यते; न चासौ तत्र प्रमितिमुत्पादयति ।'—न्यायकु० पृ० २८। प्रमेयक० पृ० १४ । 'सनिकर्षस्य च यौगाभ्युपगतस्याचेतनत्वात्कुतः प्रमितिकरणत्वम् ? कुतस्तरां प्रमाणत्वम् ? कुतस्तमां प्रत्यक्षत्वम् ? किं च, रूपप्रमितेरसंनिकृष्टमेव चक्षुर्जनकम्, अप्राप्यकारित्वात्तस्य । ततः संनिकर्षाभावेऽपि साक्षात्कारिप्रमोत्पत्तेर्न संनिकर्षरूपतैव प्रत्यक्षस्य ।'—न्या० दी० पृ० २१ ।

पणविशिष्टार्थप्रमितावसाधकतमत्वात् । अर्थप्रमितावसाधकतमत्वं च स्वप्रमितावसाधकतमत्वेन सिद्धम् । तथा हि—न संनिकर्षोऽर्थप्रमितौ साधकतमः, स्वप्रमितावसाधकतमत्वात्, घटवत् । न ह्यचेतनोऽर्थः स्वप्रमितौ करणम्, तद्वत् । तस्मात्र संनिकर्षः प्रमाणमन्यत्रोपचारात्, प्रदीपादिवत् । यथा प्रदीपादीनां[1] करणत्वमुपचारात् तथा संनिकर्षस्यापि ।

§ १४. किं च, अव्याप्त्यतिव्याप्तिदोषसंभवेन 'संनिकर्षः प्रमाणम्' इति लक्षणं नाचूणमुपलभ्यते परीक्षादक्षैः । तथा हि—यथा चक्षुषा संयुक्ते घटे संयोगाद् घटज्ञानम्, संयुक्तसमवायाद् रूपज्ञानम्, संयुक्तसमवेतसमवायाद् रूपत्वज्ञानम् [इति], संयोग-संयुक्तसमवाय-संयुक्तसमवेतसमवाय-संबन्धत्रयवशाद् [2]घट-रूप-रूपत्व-ज्ञानमुररीक्रियते भवता तथा घट-रस-रसत्व-ज्ञानमप्युररीक्रियताम्, संबन्धत्रयस्य तत्रापि सत्वात्, इत्यव्याप्तिः । संनिकर्षस्याज्ञानरूपस्य प्रामाण्ये घटादिप्रमेयार्थस्यापि प्रामाण्यप्रसंग इत्यतिव्याप्तिः । तथा चाव्याप्त्यतिव्याप्तिदोषाभ्यां संनिकर्षस्य[3] प्रमाणत्वासंभवेनासंभवदोषदुष्टत्वेन च तस्य प्रामाण्यं मन्यमानो न निर्मलमना मनीषिभिरनुमन्यते । ततः कथं संनिकर्षः प्रमाणं नाम । अथ साक्षादर्थप्रमितौ साधकतमस्य ज्ञानस्योत्पादकत्वेन संनिकर्षः प्रमाणम्, तदुपचारात्प्रामाण्यमित्यायातं तस्य । मुख्यतस्तु ज्ञानस्यैव प्रामाण्यम्, तच्च भवतामनभ्युपगमादेव न प्रमाणतां याति । परमतप्रसंगश्च ।

§ १५. किं च, ज्ञानस्य प्रामाण्ये संनिकर्षस्य निष्फलत्वाद-प्रामाण्यम्, प्रमाणेन फलवता भवितव्यम्, निष्फलस्याप्रमाणत्वात् । ततो न संनिकर्षः प्रमाणम्, ज्ञानेन व्यवहितत्वात् ।

1. 'प्रदीपानां' पाठः । 2. 'घटरूपत्वज्ञान' पाठः । 3. 'स्याप्रमाणात्वा' पाठः ।

['पराभिमतं ज्ञातृव्यापारादिकं प्रमाणस्वरूपं समालोच्याधुना स्वमतेन 'स्वार्थव्यवसायात्मकज्ञानस्यैव प्रमाणत्वम्' इति निरूपयति—]

§ १६. साक्षादर्थप्रमितौ ज्ञानमेव[1] प्रमाणम्, तस्यैव साधकतमत्वात्। तदपि स्वार्थव्यवसायात्मकमेव। तथा च प्रयोगः—प्रमाणं स्वार्थव्यवसायात्मकं सम्यग्ज्ञानमेव, प्रमाणत्वाऽन्यथाऽनुपपत्तेः। यत्तु न सम्यग्ज्ञानं स्वार्थव्यवसायात्मकं तन्न प्रमाणम्, यथा संशयादिर्घटादिश्च, प्रमाणं [च] विवादापन्नम्, तस्मात्स्वार्थव्यवसायात्मकं ज्ञानमेव [प्रमाणं] भवितुमर्हति।

---

१. अत्र ज्ञानस्यैव प्रामाण्यमित्यभ्युपगच्छतां जैनानां क्रमविकसितानि प्रमाणलक्षणानि निम्नप्रकारेण द्रष्टव्यानि— 'तत्त्वज्ञानं प्रमाणं ते युगपत्सर्वभासनम्।'—आप्तमी० का० १०१। 'स्वपरावभासकं यथा प्रमाणं भुवि बुद्धिलक्षणम्।'—स्वयम्भू० का० ६३। 'प्रमिणोति प्रमीयतेऽनेन प्रमितिमात्रं वा प्रमाणम्'—सर्वार्थसि० पृ० ५८। तत्त्वार्थश्लो० पृ० ३५॥ 'व्यवसायात्मकं ज्ञानमात्मार्थग्राहकं मतम्।'—लघीय० का० ६०। 'सिद्धं यत्र परापेक्षं सिद्धौ स्वपररूपयोः। तत्प्रमाणं ततो नान्यदविकल्पमचेतनम्।' सि० वि० १-२३। 'प्रमाणमविसंवादिज्ञानमनधिगतार्थाधिगमलक्षणत्वात्।' अष्टश० अष्टस० पृ० १७५। 'तत्स्वार्थव्यवसायात्मज्ञानं मानम्.....।'—त० श्लो० वा० पृ० १७४। 'सम्यग्ज्ञानं प्रमाणम्।'—प्रमाणप० पृ० ५१। 'किं पुनः सम्यग्ज्ञानं? अभिधीयते—स्वार्थव्यवसायात्मकं सम्यग्ज्ञानं सम्यग्ज्ञानत्वात्।'—प्रमाणप० पृ० ५३। 'स्वापूर्वार्थव्यवसायात्मकं ज्ञानं प्रमाणम्।'—परी० मु० १-१। 'गेण्हइ वत्थुसहावं अविरुद्धं सम्मरूव जं णाणं। भणियं खु तं पमाणं पच्चक्खपरोक्खभेयेहिं॥'—नयचक्रं० पृ० ६५। आलापपद्धति पृ० १४५। 'सम्यग्ज्ञानं पुनः स्वार्थव्यवसायात्मकं विदुः।'—तत्त्वार्थसार १-१७। पञ्चाध्या० श्लो० ६६६। 'प्रमाणं

§ १७. अथ [1]प्रतिज्ञार्थैकदेशासिद्धत्वाद्धेतोः प्रमाणत्वस्य न प्रकृतसाध्यं प्रति गमकत्वम्, इति मतिः, सापि स्वविकल्पकल्पनाशिल्पिकल्पितैव, प्रतिज्ञार्थैकदेशासिद्धत्वस्य दोषाभासत्वात्। का पुनः प्रतिज्ञा, तदेकदेशो वा। धर्मिधर्मसमुदायः प्रतिज्ञा, तदेकदेशो धर्मो धर्मी वा स्यात्। न तावद्धर्मः, तस्य सर्वात्मनैवासिद्धत्वात्कथमेकदेशासिद्धत्वम्। धर्मी चेत्, तदपि न साधीयः, तस्य पक्षप्रयोगकालवद्धेतुप्रयोगकालेऽपि सिद्धत्वात्कथमसिद्धत्वं नाम। इति न प्रतिज्ञार्थैकदेशासिद्धत्वम्।

§ १८. अथार्थज्ञानं प्रमाणं चेत्, तस्य किं फलम्। प्रमाणेन फलवता भवितव्यम्, इत्यनालोचितवचनं नैयायिकानाम्। तत्फलं[2] हि साक्षादज्ञाननिवृत्तिः। परम्परया तु हानोपादानोपेक्षा-

---

स्वपरावभासि ज्ञानं बाधविवर्जितम्।'—न्यायावतार का० १। 'प्रमीयन्तेऽर्थास्तैः इति प्रमाणानि।'—तत्त्वा० भा० १-१२। 'प्रमाणं स्वार्थनिर्णीतिस्वभावं ज्ञानम्।'—सन्मतित० टी० पृ०५१८। 'स्वपरव्यवसायि ज्ञानं प्रमाणम्।'—प्रमाल० १-२। 'सम्यगर्थनिर्णयः प्रमाणम्।'—प्रमाणमी० १-१-२। स्या० मं० पृ० २२८। 'सम्यग्ज्ञानं प्रमाणम्।'—न्या० दी० पृ० ९।

१. तुलना—'प्रतिज्ञार्थैकदेशत्वात्पदार्थानां ह्यलिङ्गता।'—मी० श्लो० श्लो० २३२। 'प्रतिज्ञार्थैकदेशासिद्धो हेतुरिति चेत्, का पुनः प्रतिज्ञा तदेकदेशो वा। धर्मिधर्मसमुदायः प्रतिज्ञा। तदेकदेशो धर्मो धर्मी वा।'—प्रमेयरत्न० पृ० ४०। २. तुलना—'उपेक्षा फलमाद्यस्य शेषस्यादानहानधीः। पूर्वा वाऽज्ञाननाशो वा सर्वस्यास्य स्वगोचरे॥'—आप्तमी० का० १०२। 'सिद्धप्रयोजनत्वात्केवलिनां सर्वत्रोपेक्षा····मत्यादेः साक्षात्फलं स्वार्थव्यामोहविच्छेदः····परम्परया हानोपादानसंवित्तिः फलमुपेक्षा वा मत्यादेः।'—अष्टश०

स्वरूपं [1]चाऽऽविद्वदङ्गनाप्रसिद्धं* कथं हन्त हन्तुं शक्यते। अन्यदुच्यते—यदर्थज्ञानं तदर्थजन्यमभ्युपगम्यते किन्तु स्वसामग्रीत उत्पद्य अर्थग्राहकत्वेनार्थज्ञानमित्यभिधीयते। तथा च सति ज्ञानं प्रमाणम्, अर्थपरिच्छित्तिस्तु फलं [तत्] कथं निष्फलं नाम।

§ १६. अथेदमुच्यते—यद्यर्थज्ञानमर्थजन्यं न भवति तदा कथं प्रतिनियतार्थप्रकाशकत्वम्, तदपि न चोद्यक्षमम्, तस्य योग्यतावशादेव तथासिद्धत्वात्। तथा चोक्तम्—"स्वावरणक्षयोपशमलक्षणयोग्यतया हि प्रतिनियतमर्थं व्यवस्थापयति" [परीक्षा० २-९]। ततः सम्यग्ज्ञानं प्रमाणमिति प्रमाणलक्षणस्य सर्वथोपपत्तेः।

अष्टस० पृ० २८३। 'प्रमाणस्य फलं साक्षात् सिद्धिः स्वार्थविनिश्चयः।'—सिद्धिवि० १-३। 'अज्ञाननिवृत्तिः हानोपादानोपेक्षाश्च फलम्।'—परीक्षामु० ५-१। 'यदा सन्निकर्षस्तदा ज्ञानं प्रमितिः यदा ज्ञानं तदा हानोपादानोपेक्षाबुद्धयः फलम्।'—वात्स्या० भा० पृ० १७। 'प्रमाणतायां सामग्र्यास्तज्ज्ञानं फलमिष्यते। तस्य प्रमाणभावे तु फलं हानादिबुद्धयः॥'—न्या० मं० पृ० ६२। 'विषयाधिगतिश्चात्र प्रमाणफलमिष्यते। स्ववित्तिर्वा प्रमाणं तु सारूप्यं योग्यतापि वा॥'—तत्त्वसं० श्लो० १३४४।

* एतादृक्प्रयोगोऽन्यत्रापि दृश्यते। यथा—

आविद्वदङ्गना-सिद्धमिदानीमपि दृश्यते।
एतच्चापस्तदन्यत्तु सुबह्वागम-भाषितम्॥

—योगदृष्टिसमु०, श्लोक ५५।

१. तुलना—'ननु विज्ञानमर्थजनितमर्थाकारं चार्थस्य ग्राहकम्। तदुत्पत्तिमन्तरेण विषयं प्रति नियमायोगात्। तदुत्पत्तेरालोकाद्यविशिष्ट-

---

1. 'चाविद्वदंगना' पाठः।

त्वात्, ताद्रूप्यरहिताया एव तत्पारतं प्रति नियमहेतुत्वात् ।'—प्रमेयर० २-१; पृ० ४७ । तत्र सूत्रम्—'अतज्जन्यमपि तत्प्रकाशकं प्रदीपवत् ।'—परीक्षामु० २-८ । 'ननु यद्यर्यादजातस्यार्थरूपाननुकारिणो ज्ञानस्यार्थसाक्षात्कारित्वं तदा नियतदिग्देशकालवर्तिपदार्थप्रकाशप्रतिनियमे हेतोरभावात्सर्वं विज्ञानमप्रतिनियतविषयं स्यात् ।' अत्र समाधानमाहुः—स्वावरणेत्यादि । अस्यायमर्थः—'स्वानि च तान्यावरणानि च स्वावरणानि तेषां क्षय उदयाभावः । तेषामेव सदवस्था उपशमः तावेव लक्षणं यस्या योग्यतायास्तया हेतुभूतया प्रतिनियतमर्थं व्यवस्थापयति प्रत्यक्षमिति शेषः । हि यस्मादर्थे । यस्मादेवं ततो नोक्तदोष इत्यर्थः । इदमत्र तात्पर्यम्,—कल्पयित्वाऽपि ताद्रूप्यं तदुत्पत्तिं तदध्यवसायं च योग्यताऽवश्याऽभ्युपगन्तव्या । ताद्रूप्यस्य समानार्थैस्तदुत्पत्तेरिन्द्रियादिभिस्तद्द्वयस्यापि समानार्थसमनन्तरप्रत्ययैस्तत्त्रितयस्यापि शुक्ले शङ्खे पीताकारज्ञानेन व्यभिचारात् योग्यताश्रयणमेव श्रेय इति ।'—प्रमेयरत्नमा० २-१ । पृ० ४९, ५० भट्टाकलङ्कदेवा अपि प्राहुः—'मलविद्धमणिव्यक्तिर्यथाऽनेकप्रकारतः । कर्मविद्धात्मविज्ञप्तिस्तथाऽनेकप्रकारतः ॥५७॥ यथास्वं कर्मक्षयोपशमापेक्षिणी करणमनसी निमित्तं विज्ञानस्य, न बहिरर्थादयः । "नाननुकृतान्वयव्यतिरेकं कारणं नाकारणं विषयः" इति बालिशगीतम्, तामसखगकुलानां तमसि सति रूपदर्शनम्, आवरणविच्छेदात्, तदविच्छेदात् आलोके सत्यपि संशयादिज्ञानसंभवात् । काचाद्युपहतेन्द्रियाणां शंखादौ पीताद्याकारज्ञानोत्पत्तेः । मुमूर्षूणां यथार्थभवमर्थे सत्यपि विपरीतप्रतिपत्तिसद्भावात् नार्थादयः कारणं ज्ञानस्य इति स्थितम् ।' अन्यच्च—'न तज्जन्म न ताद्रूप्यं न तद्व्यवसितिः सह । प्रत्येकं वा भजन्तीह प्रामाण्यं प्रति हेतुताम् ॥५८॥ नार्थः कारणं विज्ञानस्य कार्यकालमप्राप्य निवृत्तेः, अतीततमवत् । न ज्ञानं तत्कार्यम्, तदभाव एव भावात्, तद्भावे चाभावात्, भविष्यत्तमवत् । नार्थसारूप्यभृत् विज्ञानम्, अमूर्त्तत्वात् । मूर्त्ता एव हि दर्पणादयो मूर्त्तमुखादिप्रतिबिम्ब-

तदपि स्वार्थव्यवसायात्मकविशेषणविशिष्टमेव, न तु ज्ञानमात्रं किंचिद्व्यवसायात्मकं वा, मिथ्याज्ञानस्यापि प्रामाण्यप्रसंगात् ।

§ २०. अथ स्वसंवेदनेन्द्रिय-मनो-योगिलक्षणचतुर्विधस्यापि समक्षस्याव्यवसायात्मकत्वेऽप्यविसंवादेन प्रामाण्योपपत्तेः कथं व्यवसायात्मकमेव सर्वं ज्ञानं प्रमाणम्, अनुमानस्यैव व्यवसाया-त्मकत्वेनाभ्युपगमात्, इति मतम्, तदप्यज्ञानविजृम्भितम्,

---

धारिणो दृष्टाः, नामूर्तं मूर्तप्रतिबिम्बभृत्, अमूर्तं च ज्ञानम्, मूर्तिधर्मभा-वात् । न हि ज्ञाने अर्थोऽस्ति तदात्मको वा, येन तस्मिन् प्रतिभासमाने प्रतिभा-सेत, तद्वत् । ततः तद्व्यवसायो न स्यात् । कथमेतदविद्यमानं वितथं ज्ञान-प्रामाण्यं प्रति उपकारकं स्यात् लक्षणत्वेन ।' ननु ज्ञानस्य तदुत्पत्तिवितदा-कारत्वे कथमर्थग्राहकत्वमतिप्रसंगादिरयत्रापि समाधानमाहुः—'स्वहेतुजनि-तोऽप्यर्थः परिच्छेद्यः स्वतो यथा । तथा ज्ञानं स्वहेतूत्थं परिच्छेदात्मकं स्वतः ॥५६॥ अर्थज्ञानयोः स्वकारणादात्मलाभमासादयतोरेव परिच्छेद्यपरिच्छेदक-भावः माल्यात्मनोः कर्तृकर्मस्वभाववत् । ततः तदुत्पत्तिमन्तरेणापि ग्राह्य-ग्राहकभावसिद्धिः स्वभावतः स्यात्, अन्यथा व्यवस्थाभावप्रसंगात् ।'—सविवृति-लघीयस्त्रय-प्रवचनपरि० का० ५७, ५८, ५९ । 'नार्थालोकौ कारणं परिच्छेद्यत्वात्तमोवत्,' 'अन्वयव्यतिरेकानुविधानाभावाच्च केशोण्डुक-ज्ञानवन्नक्तंचरज्ञानवच्च ।'—परीक्षामु० २–६,७ ।

१. तदेतच्चतुर्विधं प्रत्यक्षं बौद्धविदुषा धर्मकीर्तिना न्यायबिन्दावित्थं प्रतिपादितम्—'कल्पनापोढमभ्रान्तं प्रत्यक्षम्' । 'तच्चतुर्विधम् ।' 'इन्द्रियज्ञा-नम् ।' 'स्वविषयानन्तरविषयसहकारिणेन्द्रियज्ञानेन समनन्तरप्रत्ययेन जनितं तन्मनोविज्ञानम् ।' 'सर्वचित्तचैत्तानामात्मसंवेदनम् ।' 'भूतार्थ-भावनाप्रकर्षपर्यन्तजं योगिज्ञानं चेति ।'—न्याय० बि० प० १२, १३, १४ ।

प्रत्यक्षस्याऽव्यवसायात्मकत्वे[1]ऽविसंवादित्वासंभवात् । अविसंवादो ह्यर्थतथाभावप्रकाशकत्वेनैव व्याप्तः । तच्च व्यवसायात्मकत्वे सत्येव भवति । तदभावेऽपि चेदर्थतथाभावप्रकाशकत्वलक्षणं प्रामाण्यं प्रमाणस्यापनीपद्यते तदा संशयादीनामपि प्रामाण्यं सिद्धिसौधशिखरं समारुह्यते । [ततो] न किंचिदेतत् । प्रत्यक्षमनुमानं वा व्यवसायात्मकं सत् प्रमाणं भवितुमर्हति । अत्र प्रयोगः— ज्ञानं प्रमाणं स्वार्थव्यवसायात्मकमेव, समारोपविरुद्धत्वात्, अनुमानवत्, यत्तु न स्वार्थव्यवसायात्मकं तन्न समारोपविरुद्धम्, यथा संशयादिः, समारोपविरुद्धं चेदम्, तस्मात्स्वार्थव्यवसायात्मकमेव ।

[प्रमाणलक्षणत्वेन लक्षितस्य ज्ञानस्य स्वव्यवसायात्मकत्वसाधनम्—]

§२१. अत्रान्ये यौग-मीमांसक-सांख्या वदन्ति । अस्तु नाम व्यवसायात्मकं ज्ञानं प्रमाणम्, परं तत् अर्थव्यवसायात्मकमेव न च स्वव्यवसायात्मकम्, स्वात्मनि क्रियाविरोधात् । न हि सुशिक्षितोऽपि नटवटुः स्वकायस्कन्धमारोहति । न हि सुतीक्ष्णोऽपि खड्गधारः स्वात्मानं छिनत्ति । तथा हि—ज्ञानं न स्वव्यवसायात्मकम्, अ[2]कर्मत्वेनाप्रतीयमानात्, यद्व्यवसीयते तत्कर्मत्वेन प्रतीयते, यथा घटादिः, कर्मत्वेनाप्रतीयमानं च ज्ञानम्, तस्मान्न स्वव्यवसायात्मकम् । न चायमसिद्धो हेतुः । प्रमाणं कर्मत्वेनाप्रतीयमानम्, करणत्वात् । न हि यदेव करणं तदेव कर्म भवितुमर्हति । तयोः कर्मकरणयोः परस्परं विरोधात् । कर्म-करणकारकयोरेकत्राभिन्ने वस्तुन्यसंभवात् । घटादिपरिच्छेद्यं हि कर्म, परिच्छेदकस्तु-

1. द आ 'त्मकमेव सर्वज्ञत्वे' पाठः । 2. 'ज्ञाकर्मत्वेनाप्र०' पाठः ।

करणं, येन परिच्छिद्यते तत्करणमिति कर्तृ-कर्म-करणानां परस्परभेदः, भिन्नप्रत्ययविषयत्वात्, भिन्नार्थक्रियाकारित्वात्, भिन्नकारणप्रभवत्वाच्च, घटपटादिवत्। येषां भिन्नप्रत्ययविषयत्वं ते भिन्ना एव, यथा घट-पटादयः, तथा चामी, तस्मात्तथेति। ततश्च न स्वव्यवसायात्मकम्, स्वात्मनि क्रियाविरोधात्।

§२२. तत्तमोविलसितम्, तथा हि—सम्यग्ज्ञानं स्वव्यवसायात्मकम्[1], अर्थव्यवसायात्मकत्वात्, यत्तु न स्वव्यवसायात्मकं तन्नार्थव्यवसायात्मकम् यथा घट-पटादि,अर्थव्यवसायात्मकं च ज्ञानम्, तस्मात्स्वव्यवसायात्मकमिति।

[स्वात्मनि क्रियाविरोधं परिहरति—]

§२३. यदत्र स्वात्मनि क्रियाविरोधो बाधक इत्युक्तम्, तदपि न परिज्ञम्, स्वात्मनि क्रिया विरुद्धयते—किं धात्वर्थलक्षणा, उत्पत्तिलक्षणा, ज्ञप्तिलक्षणा वा[1]। न तावद्धात्वर्थलक्षणा तत्र विरुद्धयते, तत्र तस्या[2] अविरोधात्। क्रियाया (धात्वर्थलक्षणायाः) द्विष्ठत्वात्। एका धात्वर्थलक्षणा क्रिया कर्तृस्था। अन्या च कर्मस्था।

---

१. परीक्षामुखसूत्रेऽपि युक्ति-दृष्टान्तपुरस्सरं ज्ञानस्य स्वव्यवसायात्मकत्वं प्रसाधितम्। तदित्थम्—'स्वोन्मुखतया प्रतिभासनं स्वस्य व्यवसायः', अर्थस्येव तदुन्मुखतया', 'घटमहमात्मना वेद्मि', 'कर्मवत्कर्तृकरणक्रियाप्रतीतेः', 'शब्दानुच्चारणेऽपि स्वस्यानुभवनमर्थवत्', 'को वा तत्प्रतिभासिनमर्थमध्यक्षमिच्छंस्तदेव तथा नेच्छेत्', 'प्रदीपवत्'—परीक्षामु० १–६, ७, ८, ९, १०, ११, १२।

---

1. द प्रतौ 'वा' पाठो नास्ति। 2. 'तस्या विरोधात्' पाठः।



तदुक्तम्—

कर्मस्थः पचतेर्भावः कर्मस्था च भिदेः क्रिया।
[1]समासिभावः कर्तृस्थः कर्तृस्था च गमेः क्रिया ॥१॥ [ ]

§२४. या चोत्पत्तिलक्षणा स्वात्मनि विरुद्धयते सा विरुद्धय-ताम्, तद्विरोधस्याङ्गीकरणात्[१]। यदुक्तम्—

अद्वैतैकान्तपक्षेऽपि दृष्टो भेदो विरुद्धयते।
कारकाणां क्रियायाश्च नैकं स्वस्मात्प्रजायते ॥

[आप्तमी० का० २४]

§२५. अथ ज्ञप्तिलक्षणा क्रिया, न सा[2] विरुद्धयते, कथंचित्कर्तुरभिन्नस्य करणस्य विद्यमानत्वात्। तथा हि—आत्मा कर्त्ता स्वसंवेद्यो भवता [स्वीकृतः], तत्र कथं कर्मत्वं न विरुद्धयते? अथाऽऽत्मा कर्तृत्वेन प्रतीयमानो न विरुद्धयते, स्वप्रकाशरूपत्वात्, प्रदीपवत्, तर्हि तद्धर्मो ज्ञानमपि करणत्वेन प्रतीयमानं कथं विरोधमर्हति, प्रदीपभासुराकारवत्। तस्मान्न कर्तृ-करण-क्रियाणां कथंचित्परस्परभिन्नानां स्वप्रकाशरूपाणां स्वार्थप्रकाशकत्वमाविद्वदङ्गनाप्रसिद्धतया प्रतीयमानं विरोधतामाचनोस्कन्यते। तस्मात् 'स्वार्थव्यवसायात्मकं ज्ञानं प्रमाणम्' इति प्रमाणस्य लक्षणं सिद्धम्।

इति प्रमाणतत्त्व-परीक्षा।

---

१. न हि वयं स्वस्मादेव स्वस्योत्पत्तिरभ्युपगम्यते इति भावः।

---

1. 'मासासिभावः' पाठः। 2. 'वि या' पाठः। 3. 'कर्म' पाठः

[२. प्रमेयतत्त्व-परीक्षा]

[प्रमाणतत्त्वं परीक्ष्य सांप्रतं प्रमेयतत्त्वपरीक्षामुपक्रमते—]

§२६. ननु प्रमाणं भवतु ज्ञानरूपमज्ञानरूपं वा, परं तत्प्रमेयार्थमङ्गीक्रियते, प्रमीयते येन प्रमेयार्थस्तत्प्रमाणमिति निर्वचनात्। स च प्रमेयार्थः सामान्यं विशेषो वा, उभयमनुभयं वा, एकमनेकं वा, अनेकमप्येकधर्मात्मकमनेकधर्मात्मकं वा, परस्परनिरपेक्षं सापेक्षं वा, वस्तुस्वरूपं वक्तव्यमवक्तव्यं वा, वक्तव्यावक्तव्यं वा, सविकल्पमविकल्पं वा, भावरूपमभावरूपं वा, निरपेक्षभावाभावरूपं वा, [परस्परसापेक्षं] उभयात्मकं वा, सगुणं निर्गुणं वा, परस्परनिरपेक्षमुभयं वा, [परस्परसापेक्षं] उभयात्मकं वा, अद्वैतं द्वैतं वा, नित्यमनित्यं वा, निरपेक्षनित्यानित्यं वा, तदपि सापेक्षं वा, क्षणिकमक्षणिकं वा, क्षणिकाक्षणिकं वा, सर्वथा शून्यं वा, स्वधर्मैः सम्बद्धमसम्बद्धं वा, सक्रियमक्रियं वा, शुद्धमशुद्धं वा, उत्पन्नमनुत्पन्नं वा, इति पृष्टः स्पष्टमाचष्टे।

[तत्र प्रथमं सामान्यमेव प्रमाणस्य विषय इति मतं समालोचयति—

§२७. न तावत्सामान्यमेव प्रमाणस्य विषयः, विशेषनिरपेक्षस्य तस्यासंभवात्। यदुक्तम्—

'निर्विशेषं हि सामान्यं भवेत् खरविषाणवत्।' [मी० श्लो० आकृति० श्लो० १०] इति। निराश्रयस्य सामान्यस्य क्वचित्कदाचित्कथंचित्केनचिदनुपलभ्यमानत्वात्, वन्ध्यास्तनन्धयवत्। सामान्यं[1] हि नाम समानो धर्मः सधर्मः, स च खण्ड-मुण्डादि-

---

१. तत्रायं विवेकः—'सामान्यमनुवृत्तिस्वरूपम्। तच्च घटत्वं पृथुबुध्नोदराकारः, गोत्वमिति सास्नादिमत्त्वम्। तस्मान्न व्यक्तितोऽत्यन्तमन्यन्नित्यमेकमनेकवृत्ति।'—न्यायदी० पृ० ११७। 'सामान्यं द्विविधम्—ऊर्ध्वतासामान्यं तिर्यक् सामान्यं चेति। तत्रोर्ध्वतासामान्यं क्रमभाविषु पर्यायेष्वेकत्वान्वयप्रत्ययग्राह्यं द्रव्यम्। तिर्यक्सामान्यं नानाद्रव्येषु पर्यायेषु

व्यक्त्यभावे[1] कुतः स्वात्मानमासादयति। तथा च प्रयोगः—नास्ति केवलं सामान्यम्, व्यक्त्यभावेऽनाश्रितत्वात्। यो हि वास्तवो धर्मः स न अनाश्रयो दृष्टः, यथा सुख-दुःख-हर्ष-विषादादिः[2], अनाश्रितश्चायम् (सामान्यरूपो धर्मः), तस्मान्नास्ति। तच्च सामान्यं वास्तवमवास्तवं वा। न तावदवास्तवम्, सौगतमतानुषङ्गात्। नापि वास्तवम्, वास्तवे तत्किं धर्मो धर्मी वा स्यात्। धर्मश्चेत्, स किं साधारणोऽसाधारणो वा। न तावदसाधारणः, तस्य विशेषरूपताऽऽपत्तेः। अथ साधारणः, स चासिद्धः, यतः कैः सह साधारणत्वं तस्य, पदार्थान्तराभावात्। तदभावश्च प्रमाणाविषयत्वात्। प्रमाणविषयत्वेन केवलं सामान्यमेवाङ्गीक्रियते [भवता]। तदित्थं न साधारणोऽपि धर्मो विचारणां प्राञ्चति। नापि धर्मी, सामान्यस्य पदार्थधर्मत्वात्। धर्मित्वेनाङ्गीक्रियमाणस्य तस्य स्वरूपेणैवासिद्धत्वात्। धर्मिणः पदार्थत्वेन सर्वैरपि लौकिकैः परीक्षकैर्वाऽङ्गीकरणात्सामान्यमात्रमेव तत्त्वमिति पक्षे कक्षीक्रियमाणे धर्मिणः कस्यचिदप्यभावात्। धर्मीसामान्यमिति सामान्यमात्रं बन्ध्यास्तनन्धयो गौर इत्यादिवत् कथं न विरोधमास्कन्दति। तस्माद्गगनारविन्दमकरन्दव्यावर्णनमिव 'सामान्यमेव प्रमाणस्य विषय' इत्यादि सर्वमनवधेयार्थविषयत्वेनोपेक्षामर्हति।

[विशेष एव प्रमाणस्य विषय इति सौगतमतमुपन्यस्य तदपि समालोचयति—]

च सादृश्यप्रत्ययग्राह्यं सदृशपरिणामरूपम्।'—युक्त्यनुशा० टी० पृ० ९०। 'सामान्यं द्वेधा तिर्यगूर्ध्वताभेदात्। ४-३। 'सदृशपरिणामस्तिर्यक् खण्डमुण्डादिषु गोत्ववत्।' ४-४। 'परापरविवर्तव्यापि द्रव्यमूर्ध्वता, मृदिव स्थासादिषु।'—४-५। परीक्षामुख।

1. 'व्यक्त्याभावे' पाठः। 2. 'दिर्यया' पाठः।

§२८. एतेन 'विशेष एव प्रमाणस्य विषयः' इति सौगताभिमतमपि निरस्तं बोद्धव्यम्, तस्यापि केवलस्य युगसहस्रे[1]णाऽप्यप्रतिभासनात्। तदप्युक्तम्—

'सामान्यरहितत्वेन विशेषास्तद्वदेव हि'।

[मी० श्लो० आकृति० श्लो० १] इति।

§२९. विशेषो[1] हि नाम व्यावृत्तिलक्षणो धर्मः, स च धर्मिणो द्रव्यस्याभावे कौतस्कुतः प्रमाणतामियृयात्। अथ द्रव्यस्य कस्यचिदपि विचार्यमाणस्याभावात् कथं विशेषाणां तदपेक्षा। स्वतन्त्रा एव विशेषाः प्रतिभासन्ते। तथा हि—विशेषा एव तत्त्वम्, प्रत्यक्षादिप्रमाणानां तद्गोचरचारित्वेनैव प्रामाण्याभ्युपगमात्, न च द्रव्यत्वसामान्यं प्रमाणतः सिद्धम्। ततो नास्ति द्रव्यम्, प्रत्यक्षादिप्रमाणाविषयत्वात्, शशविषाणवत्। तथा हि—नाध्यक्षं तत्साधकम्, तस्य रूपादिनियतगोचरचारित्वात्, सम्बद्ध-वर्तमानविषयत्वाच्च। चाक्षुषाऽध्यक्षेण रूपमेव सम्बद्धं वर्तमानं च गृह्यते। स्पार्शनेन[2] स्पर्श एव, घ्राणजेन[3] गन्ध एव, रासनेन रस एव, श्रावणेन[4] शब्द एव, न तु रूप-रस-गन्ध-स्पर्श-शब्दानां परस्परपरि-

---

१ को नाम विशेष इत्यारेकायामाह विशेषेति। 'विशेषो नाम 'स्थूलोऽयं घटः, सूक्ष्मः इत्यादिव्यावृत्तप्रत्ययालम्बनं घटादिस्वरूपमेव।'— न्या० दी० पृ० १२०। तदुक्तं परीक्षामुखे—'विशेषश्च'। ४-६। 'पर्याय-व्यतिरेकभेदात्।' ४-७। 'एकस्मिन् द्रव्ये क्रमभाविनः परिणामाः पर्याया आत्मनि हर्षविषादादिवत्।' ४-८। 'अर्थान्तरगतो विसदृशपरिणामो व्यतिरेको गोमहिषादिवत्।' ४-९।

---

1. 'युगसहस्रणा' पाठः। 2. 'स्पार्शेन' पाठः। 3. 'घ्राणेन' पाठः।

द्वारेणावस्थितानां विशेषरूपाणां व्यापकं द्रव्यं [1]चाक्षुपादिप्रत्यक्षा-[2]सिद्धम् । तत्कथं प्रत्यक्षतस्तत्सद्भावः । [[3]नाप्यनुमानं तत्साधकम्, तस्य संबन्धग्रहणपूर्वकत्वात्, संबन्धग्राहकं च न किंचित्प्रमाणमस्ति]। न तावत्प्रत्यक्षं तत्संबन्धग्राहकम्, तेन तथाविधसाध्यसाधनसम्बन्धस्याग्रहणात् । द्विष्ठो हि सम्बन्धः, एकस्य ग्रहणेऽपि अन्यस्याग्रहणे तदसंभवात् । तथा चोक्तम्—

> द्विष्ठसंबन्धसंवित्तिर्नैकरूपप्रवेदनात् ।
> द्वयोः स्वरूपग्रहणे सति संबन्धवेदनम् ॥
> [प्र० वार्तिकाल० १-२] इति ।

§३०. प्रत्यक्षस्य तद्ग्रहणं कुत इति चेत्, तस्य रूपादिनियत-गोचरचारित्वेन प्राक् प्ररूपितत्वात् । पर्यायमात्रग्रहणे पर्यवसित-

१. तुलना—'न हि प्रत्यक्षं यावान्कश्चिद्धूमः कालान्तरे देशान्तरे च पावकस्यैव कार्यं नार्थान्तरस्येतीयतो व्यापारान् कर्तुं समर्थम्, सन्निहित-विषयबलोत्पत्तेरविचारकत्वात् ।'—लघीय० विवृ० का० ११, अष्टस० पृ० २८०, प्रमाणपरी० पृ० ७०, प्रमेयक० ३-१३। प्रमेयरत्न० ३-२, पृ० ३६।

२. इयं कारिका निम्नग्रन्थेष्वपि समुद्धृता—तत्त्वार्थश्लो० वा० ५-२४, पृ० ४२१। सिद्धिविनिश्चय पृ० १३०। सम्मतितर्क पृ० ४८३। रत्नाकरावता० १-२०, पृ० ४२। स्याद्वादर० का० १६, पृ० १३०।

1. 'चक्षुरादि' पाठः। 2. 'प्रत्यक्षासिद्धम्' पाठः। 3. अत्र पाठः त्रुटितः प्रतीयते, अतः कोष्ठकान्तर्गतः पाठोऽस्माभिर्निक्षिप्तः।—संपादकः।

त्वात्र द्रव्यग्रहणे स्वप्नेऽप्यप्रवृत्तेः । अनुमानादपि संबन्धग्रहणं नास्ति । अतएवानुमानाद् ग्रहणमनुमानान्तराद्वा । अतएव चेदन्योन्याश्रयः । सिद्धे हि द्रव्ये तल्लिङ्गस्य सम्बन्धसिद्धिस्तत्सिद्धावनुमानसिद्धिरिति । अनुमानान्तराच्चेदनवस्था । [ततः] अनुमानादपि न द्रव्यसिद्धिः, किन्तु पर्याया एव तत्त्वम्, तेषामेव प्रमाणविषयत्वं सिद्धिमधिवसति[1] ।

§३१. अथेदमुच्यते–यदि विशेषा एव तत्त्वम्, तर्हि ते प्रत्यक्षत एव *सिद्धाः किमनुमानसाध्यम्, येनानुमानमपि प्रमाणान्तरमाश्रीयते* । अन्यथ 'प्रमेयद्वैविध्यात्प्रमाणद्वैविध्यम'[2] [प्र० वा० २-१] इति वचनमप्युन्मत्तभाषितमेव स्यात्, तदेतदप्यस्मदभिप्रायापरि-

---

१ नाप्यनुमानेन साध्यसाधनसम्बन्धग्रहणम्, 'तस्यापि देशादिविषयविशिष्टत्वेन व्याप्त्यविषयत्वात् । तद्विषयत्वे वा प्रकृतानुमानान्तरविकल्पद्वयानतिक्रमात् । तत्र प्रकृतानुमानेन व्याप्तिप्रतिपत्तावितरेतराश्रयत्वप्रसंगः । व्याप्तौ हि प्रतिपन्नायामनुमानमात्मानमासादयति, तदात्मलाभे च व्याप्तिप्रतिपत्तिरिति । अनुमानान्तरेणाविनाभावप्रतिपत्तावनवस्थाचमूरी परपक्षचमूं चञ्चमीतीति नानुमानगम्या व्याप्तिः ।'—प्रमेयरत्न० २-२, पृ० ३६–३७ तथा ८९ ।

२. 'प्रमाणं द्विविधं मेयद्वैविध्यात्'—प्र० वा० २–१ ।
'न प्रत्यक्ष-परोक्षाभ्यां मेयस्यान्यस्य संभवः ।'—प्र०वा०२–६३ ।
'ते हि प्रमेयद्वैविध्यात्प्रमाणं द्विविधं जगुः ।
नान्यः प्रमाणभेदस्य हेतुर्विषयभेदतः ॥'
—न्यायमं० पृ० २७ ।

---

1. 'विषयत्वसिद्धिमधिवसति' पाठः ।

ज्ञानादेव भवताऽभाणि; स्वलक्षणानां[1] क्षणिकत्वादिसाध्येऽनुमानचरितार्थत्वात् ।

§३२. तदेतन्न तथ्यम्, ताथागतानामपि द्रव्यसामान्यस्य निराकर्तुमशक्यत्वात् । 'प्रत्यक्षादिप्रमाणाविषयत्वाद् द्रव्यं किमपि नास्तीति' यदुक्तं भवता तत्सर्वमपि फल्गुप्रायं स्यात्, तस्य प्रत्यभिज्ञानप्रमाणेन सिद्धत्वात् । न प्रत्यभिज्ञानमप्रमाणम्, तस्याप्यविसंवादकत्वात्प्रत्यक्षादिवत् । यथा प्रत्यक्षानुमानाभ्यामर्थं परिच्छिद्य वस्तूपदर्शक[1]त्वप्रापकत्वाविसम्वादकत्वेभ्यः प्रामाण्यं तथैकत्वनिबन्धनस्य प्रत्यभिज्ञानस्यापि, घटादिपर्यायेषु मृद्द्रव्यस्यानुभूतस्य (अन्वयिनः) साधकत्वेनाऽऽबाल-गोपालादीनामपि प्रतीतिसिद्धत्वात्, प्रत्यभिज्ञानं प्रमाणमेव । ततः सिद्धं द्रव्यम्, निराश्रयाणां पर्यायादीनां स्वप्नेऽप्यप्रतीतेः । तथाऽनुमानादपि द्रव्यसिद्धिः—अस्ति द्रव्यम्, पर्यायाणामन्यथानुपपद्यमानत्वात्, यत्र न द्रव्यपदार्थस्तत्र न विशेषाः, यथा मृद्द्रव्याभावे घटादयः, अनुपपद्यमानत्वं च द्रव्याभावे विशेषाणाम् । तस्मात्पारमार्थिकपर्यायाणां सद्भावे द्रव्यमपि पारमार्थिकमुररीकर्त्तव्यम् । तत्कथं[2] विशेषा एव तत्त्वमिति ।

[प्रमाणविषयत्वेनाभ्युपगतं केवलं सामान्यं केवलं विशेषं च निरस्याधुना स्वमतेन सापेक्षं सामान्यविशेषोभयं प्रमाणविषयं दर्शयति—]

---

१ किं नाम स्वलक्षणम्—'यस्यार्थस्य संनिधानासंनिधानाभ्यां ज्ञानप्रतिभासभेदस्तत्स्वलक्षणम्', 'तदेव परमार्थसत्', 'अर्थक्रियासामर्थ्यलक्षणत्वाद्वस्तुनः', 'अन्यत्सामान्यलक्षणम्', 'सोऽनुमानस्य विषयः ।'—न्यायबि० पृ० १५, १६, १७, १८ ।

---

1. 'दर्शकप्रापकत्वादपि' पाठः । 2. 'कथं' पाठः ।

§ ३३. अथोभयं प्रमाणस्य विषयः, तत्किं सापेक्षं निरपेक्षं वा। सापेक्षं चेत्, सिद्धसाधनम्। सापेक्षयोः सामान्य-विशेषयोः कथंचित्तादात्म्याभ्युपगमेन एकत्राभिन्ने वस्तुनि स्याद्वादिभिरंगीकरणात् तथैव प्रमेयत्वस्य सिद्धत्वात्। तथा हि–जीवादितत्त्वं सामान्यविशेषात्मकमेव, प्रमेयत्वात्, यत्तु न सामान्यविशेषात्मकं तन्न प्रमेयम्, यथा केवलं सामान्यं केवलो विशेषो वा, प्रमेयं चेदम्, तस्मात्सामान्यविशेषात्मकमेव। तथा चोक्तम्—'स्यात्सामान्यम्, स्याद्विशेषः, स्यादुभयम्, स्यादवक्तव्यम्, स्यात्सामान्यावक्तव्यम्, स्याद्विशेषावक्तव्यम्, स्यात्सामान्यविशेषावक्तव्यम्' [   ] इति सप्तभङ्गैर्निरूपितत्वात्। तथा सति विरोधादिदोषाणामप्यसंभवात्। तथैव प्रतीयमानत्वात्।

[स्वमतं प्रदर्श्येदानीं वैशेषिकाभिमतस्य निरपेक्षस्य सामान्यविशेषोभयस्य प्रमाणविषयत्वं निराकरोति—]

§ ३४. निरपेक्षं चेदुभयं प्रमाणस्य विषयः, न, विरोधादिदोषोपनिपातात्। [१] निरपेक्षयोः सामान्यविशेषयोर्विधिप्रतिषेध-भावाभावरूपयोर्विरुद्धधर्मयोरेकत्राभिन्ने वस्तुन्यसंभवात्, शीतोष्णवत्, इति विरोधः। [२] न हि यदेव विधेरधिकरणं तदेव

---

१ तदुक्तमकलङ्कदेवैः—'तद्द्रव्यपर्यायात्मार्थो बहिरन्तश्च तत्त्वतः।'–लघी० का० ७। 'भेदाभेदैकान्तयोरनुपलब्धेः अर्थस्य सिद्धिः अनेकान्तात्। नान्तर्बहिर्वा स्वलक्षणं सामान्यलक्षणं वा परस्परानात्मकं प्रमेयं यथा मन्यते परैः, द्रव्यपर्यायात्मनोऽर्थस्य बुद्धौ प्रतिभासनात् न केवलं साक्षात्करणं एकान्ते न संभवति, अपि तु—अर्थक्रिया न युज्येत नित्यक्षणिकपक्षयोः। क्रमाक्रमाभ्यां भावानां सा लक्षणतया मता॥'—लघी० का० ८। माणिक्यनन्दिनाऽप्युक्तम्—'सामान्यविशेषात्मा तदर्थो विषयः।' परीक्षाम० ४–१।

प्रतिषेधस्याधिकरणं भवितुमर्हति, एकरूपताऽऽपत्तेः, ततो वैयधिकरण्यमपरम्। [३] येनाऽऽत्मना सामान्यस्याधिकरणं येन च विशेषस्य तावप्यात्मानौ एकेनैव स्वभावेनाधिकरोति द्वाभ्यां स्वभावाभ्यां वा। एकेनैव चेत्, न तत्, पूर्वापरविरोधात्। द्वाभ्यां वा स्वभावाभ्यां स्वभावद्वयमधिकरोति तदाऽनवस्था, तावपि स्वभावान्तराभ्यामिति। [४] संकर[1]दोषश्च—येनाऽऽत्मना सामान्यस्याधिकरणं तेन सामान्यस्य विशेषस्य च। येन च विशेषस्याधिकरणं तेन विशेषस्य सामान्यस्य चेति। [५] येन स्वभावेन सामान्यं तेन विशेषः येन च विशेषस्तेन च सामान्यमिति व्यतिकरः[1]। [६] ततश्च वस्तुनोऽसाधारणाकारेण निश्चेतुमशक्तेः संशयः। [७] ततश्चाप्रतिपत्तिः। [८] ततोऽभाव इति सामान्यविशेषयोः स्वसंश्रयोः केनचित्प्रमाणेन गृहीतुमशक्यत्वात्खरविषाणवदप्रमेयत्वम्। तत्र सामान्यविशेषयोः स्वसंश्रयोरेकस्मिन्नपि वस्तुन्यव्यवस्थितयोः प्रमाणविषयत्वम्, विरोधादिदोषेणाप्रमेयत्वात्। स्याद्वादिनां तु जात्यन्तर-[स्वी]-करणेन न कश्चिद्दोषो विपश्चिच्चेतसि चकास्ति।

§ ३५. अथेदमुच्यते, नैतदेवम्, द्रव्य-गुण-कर्म-सामान्य-विशेष-समवायाः षडेव पदार्थाः परस्परं भिन्नाः तथा सति यथा यदा यः पदार्थस्तिष्ठति तदा तदुन्मुखतया यदुत्पन्नं प्रमाणं तमेव

---

१. संकरव्यतिकरयोः को भेद इत्यत्रोच्यते—सर्वेषां युगपत्प्राप्तिः संकरः, परस्परविषयगमनं च व्यतिकरः।

---

1. 'संकरदोषः' पाठः।

विषयीकरोति। अथेदमुच्यते, कथममीषां भेदो येनैवं[1]स्यादिति [चेत्], ब्रूमः—द्रव्यादयः पदार्थाः परस्परं भिन्नाः [भिन्नप्रत्ययविषयत्वात्],[1] भिन्नलक्षणलक्षितत्वात्, भिन्नकारणप्रभवत्वात्, भिन्नार्थक्रियाकारित्वात्, भिन्नकार्यजनकत्वात्। घट-पटवत्। य एवं त एवं दृष्टाः, यथा घटादयः। एवंविधाश्चैते सर्वे। तस्मादेवंविधा एव। तत्र न तावद् भिन्नप्रत्ययविषयत्वमसिद्धम्, इदं द्रव्यमित्यादिप्रत्ययानां प्रतीयमानत्वात्। भिन्नलक्षणलक्षितत्वमपि नासिद्धम्। तथा हि—'क्रियावद्गुणव[2]त्समवायिकारणं द्रव्यम्' [वैशे० सू० १-१-१५] इति द्रव्यलक्षणम्। 'द्रव्याश्रया निर्गुणा गुणाः'[2] [तत्त्वा० ५-४१] इति गुणलक्षणम्। 'उत्क्षेपणावक्षेपणाकुञ्चनगमनप्रसारणानि[3] कर्माणि' [वैशे० सू० १-१-७] इति कर्मलक्षणम्। अनेकव्यक्तिनिष्ठं सामान्यम्[4]। एक-

१. तुलना—'द्रव्यपर्यायो अत्यन्तं भिन्नौ भिन्नप्रतिभासत्वात्, घट-पटादिवत्'—'तथा विरुद्धधर्माध्यासतोऽपि अनयोः जलानलवत् भेदः।' न्यायकु० पृ० ३५१। एवं 'भिन्नार्थक्रियाकारित्वात्, भिन्नकारणप्रभवत्वात्, भिन्नकालत्वात्।' इत्यपि न्यायकुमुदचन्द्रे (पृ० ३६२) प्रत्येयम्। २. अत्र वैशेषिकग्रन्थः—'रूपादीनां गुणानां सर्वेषां गुणत्वाभिसम्बन्धो द्रव्याश्रितत्वं निष्क्रियत्वमगुणत्वं च (लक्षणम्)'—प्रशस्त० भा० पृ० १५९-१६१। ३. 'उत्क्षेपणादीनां पञ्चानामपि कर्मत्वसम्बन्धः एकद्रव्यवत्त्वं क्षणिकत्वं मूर्तद्रव्यवृत्तित्वं अगुणवत्त्वं संयोगविभागनिरपेक्षकारणत्वं असमवायिकारणत्वं....विशेषः (लक्षणम्)'—प्रश० भा० पृ० १४७-१४८। ४. 'सामान्यं द्विविधं परमपरं च। तच्चानुवृत्तिप्रत्ययकारणम्। तत्र परं सत्ता, महाविषयत्वात्। सा चानुवृत्तेरेव हेतुत्वात् सामान्यमेव। द्रव्यत्वादि अपरम्,

1. 'येनैव' पाठः। 2. 'क्रियावद्गुणसमवायि....' पाठः।
3. 'प्रसारणकारणानि' पाठः।

व्यक्तिनिष्ठो विशेषः[1]। 'अयुतसिद्धानामाधार्याधारभूतानामिहेदंप्रत्ययलक्षणो यः संबन्धः [स] समवायः'[2] [प्रशस्त० पृ० ५] इति भिन्नलक्षणलक्षितत्वं सर्वेषामपि प्रसिद्धम्। विभिन्नकारणप्रभवत्वं ह्यनित्यानामेव, न तु[1] नित्यानाम्, ततो[2] न भागासिद्धत्वम्। 'सदकारणवन्नित्यम्' [वैशे० सू० ४-१-१] इति नित्यलक्षणस्य व्यवस्थितत्वात्। भिन्नार्थक्रियाकारित्वं च विभिन्नकार्यजनकत्वादेव सिद्धम्। विभिन्नकार्यजनकत्वं चामीषामुभयवादिप्रसिद्धत्वादेव नासिद्धम्। ततश्चामी हेतवो नासिद्धाः। नाऽपि विरुद्धाः, विपक्षवृत्त्यभावात्। नाऽप्यनैकान्तिकाः, पक्ष-सपक्षवद्विपक्षे वृत्त्यभावात्। नाऽपि कालात्ययापदिष्टाः, पक्षस्य प्रत्यक्षादिबाधि-[3]तत्वानुपपत्तेः। 'प्रत्यक्षादिबाधितेऽर्थे प्रवर्तमानो हेतुः कालात्ययापदिष्टः'[7] [न्यायमं० पृ० १६७] इति वचनात्। नाऽपि सत्प्रति-

---

अल्पविषयत्वात्। तच्च व्यावृत्तेरपि हेतुत्वात् सामान्यं सत् विशेषाख्यामपि लभते।....'स्वविषयसर्वगतमभिन्नात्मकमनेकवृत्ति....' प्रशस्त० भा० पृ० ४ तथा १६४।

१. 'अन्तेषु भवा अन्त्याः स्वाश्रयविशेषकत्वाद्विशेषाः। विनाशारम्भरहितेषु नित्यद्रव्येषु अण्वाकाशकालदिगात्ममनस्सु प्रतिद्रव्यमेकैकशो वर्तमानाः अत्यन्तव्यावृत्तिबुद्धिहेतवः।'—प्रशस्त० भा० पृ० १६८।

२. 'अयुतसिद्धानामाधार्याधारभूतानां यः सबन्ध इहप्रत्ययहेतुः स समवायः।....यथेह कुण्डे दधीति प्रत्ययः संबन्धे सति दृष्टस्तथेह तन्तुषु पटः, इह वीरणेषु कटः, इह द्रव्ये गुणकर्मणी, इह द्रव्यगुणकर्मसु सत्ता, इह द्रव्ये द्रव्यत्वम्, इह गुणे गुणत्वम्, इह कर्मणि कर्मत्वम्, इह नित्यद्रव्येऽन्त्या विशेषा इति प्रत्ययदर्शनादस्त्येषां संबन्ध इति ज्ञायते। न चासौ संयोगः संबन्धिनामयुतसिद्धत्वात् अन्यतरकर्मादिनिमित्तासम्भवात्।'—प्रश० भा० पृ० १७१-१७२। ७. 'कालात्ययापदिष्टः कालातीतः'—न्यायसू० १-२-९। 'यथा प्राप्ते हेतुप्रयोगकाल-

1. 'ननु' पाठः। 2. 'नतो' पाठः। 3. 'बाधकत्वानुपपत्तेः' पाठः।

पत्ता:, प्रतिपक्षसाधनस्य कस्यचिदप्यभावात्। ततः [illegible] द्रव्यादीनां प्रमाणस्य विषय इति।

§ ३६. एतदपि न धीमद्धृतिकरं नैयायिकं ([illegible] मन्यमानानाम्, द्रव्यादीनां सर्वथा भेदता स्यात् [illegible] द्रव्याद्भिन्नो गुणपदार्थः, तत्कथमस्यायं गुण इति [illegible] सम्बन्धाभावात्। तयोश्च सम्बन्धः किं समवायः [illegible] तावत्समवायः, तस्यासिद्धेः। तदसिद्धिश्च तस्य [illegible] योगात्। सर्वथा भेदे यः संबन्धः स कथं नाम [illegible] मर्हति, कुण्डबदरवत्, [तस्य] संयोगस्यैव संबन्ध [illegible]

§ ३७. अथ द्रव्य-गुणयोरयुतसिद्धत्वेन [illegible] संयोग इति। अत्रायुतसिद्धत्वं नाम [illegible] किं पृथक्कर्तुमशक्यत्वं वा, किं कथंचित्तादात्म्यं वा [illegible] मवतरति। प्रथमपक्षे, जलानिलादीनाम [illegible] प्रसङ्गादेकत्वं स्यात्। तथा च सति [[illegible]] [illegible]

मतीत्य यो हेतुरपदिश्यते स कालात्ययापदिष्टः [illegible]। अयमर्थः—हेतोः प्रयोगकालः [illegible] तमतीत्य प्रयुज्यमानः प्रत्यक्षागमबाधिते विषये [illegible] पदिष्टो भवति।'—न्यायमं० हेत्वाभास० पृ० [illegible]। [illegible] विरुद्धः कालात्ययापदिष्टः। अबाधित [illegible] तमतीत्यासावुपदिष्ट इति। अनुष्णोऽग्निः [illegible] विरुद्धः। ब्राह्मणेन सुरा पेया [illegible] न्यायकलिका पृ० १५।

१. वैशेषिका अभिदधति [illegible]। २. [illegible]

३. 'तत्र द्रव्याणि पृथिव्यप्तेजो [illegible] विशेषसंज्ञोक्तानि नवैव, तद्व्यतिरेके [illegible] ग्रन्थः—प्रशस्त० भा० पृ० ३।

---

1. 'वर्त्तते' आ प्रतौ पाठः। 2. [illegible]

१ पाठः।

जो-वाय्वाकाश-दिगात्म-काल-मनांसि [नवैव]' [प्रशस्त० भा० पृ० १४] इति ग्रन्थविरोधः। रूपरसादीनामप्यपृथक्सिद्धत्वेन परस्परं भेदाभावात् 'चतुर्विंशतिर्गुणाः' [प्रशस्त० भा० पृ० ३] इत्यस्यापि विरोधः। तन्नाद्यः पक्षः श्रेयान्। नापि द्वितीयः, तस्यापि विचार्यमाणस्य शतधा विशीर्यमाणत्वान्न विचारचतुरचेतसां चेतसि वर्वर्त्ति[1]। तथा हि—पृथक्कर्तुमशक्यत्वं हि द्रव्य-गुण-कर्म-सामान्य-विशेष-समवायानामप्यस्ति, तेषामपि भेदाभावप्रसंगात्। 'द्रव्यादयः षडेव पदार्थाः परस्परं भिन्नाः' इति प्रतिज्ञा हीयते।

§ ३८. स्यान्मतिरेषा[2] ते वाताऽऽतपादीनां पृथक्कर्तुमशक्यत्वे भेदाभावप्रसङ्गः, तयोरप्ययुतसिद्धत्वं स्यात्। यद्येवम्, किं तर्हि नैतावता[3] अयमतिप्रसङ्गो भवतामपि बाधकः। न ह्यनेनास्माकं बालाग्रमपि खण्डयितुं शक्यते। तस्मात्पृथक्कर्तुमशक्यत्वमयुतसिद्धत्वं न सिद्धिमधिवसति। नापि कथंचित्तादात्म्यम्, द्रव्यगुणयोः कथंचिदभेदप्रसङ्गात्। कथंचित्तादात्म्ये हि जैनमत-प्रसङ्गेन 'षडेव पदार्थाः परस्परं भिन्नाः' इति प्रच्यवते[4]। ततश्च समवायस्य कथंचित्तादात्म्यमन्तरेणासिद्धेः कथमस्य द्रव्यस्यायं गुण इति व्यपदेशः सिद्ध्येत्। तन्न 'षडेव पदार्थाः परस्परं भिन्नाः प्रमाणस्य विषयाः' इति, किन्तु गुण-गुण्यात्मकं सामान्य-विशेषात्मकं द्रव्य-पर्यायात्मकं जात्यन्तरं प्रमाणविषयत्वेन सिद्धमिति।

[परमब्रह्म एव प्रमाणस्य विषय इति वेदान्तिनां मतं विस्तरत उपन्यस्य तत्समालोचयति—]

§ ३९. ननु परमब्रह्मण एवैकस्य परमार्थतो विधिरूपस्य विद्यमानत्वात्प्रमाणविषयत्वम्, अपरस्य द्वितीयस्य कस्यचिदप्य-

1. 'वर्वर्ति द पाठः, 'वर्त्तते' आ पाठः। 2. 'स्यान्मतिरेषामेषा—ते वाता.....' पाठः। 3. न भिन्नमेतावता' पाठः। 4. 'प्रच्यवते' पाठ.।

[पूर्वपक्षी मीमांसकाभिमतमभावप्रमाणं तद्विषयमभावं च निराकुर्वन् विधितत्त्वमेव प्रसाधयति—]

§ ४२. यच्चाभावाख्यं प्रमाणम्, तस्य प्रामाण्याभावात् न तत्प्रमाणम्, तद्विषयस्य कस्यचिदप्यभावात्। यत्तु प्रमाणपञ्चकविषयः स विधिरेव, तेनैव[1] प्रमेयत्वस्य व्याप्तत्वात्। सिद्धं प्रमेयत्वेन विधिरेव तत्त्वम्। यत्तु न विधिरूपं तन्न प्रमेयम्, यथा खरविषाणम्। तथा चेदं प्रमेयं निखिलं वस्तुरूपम्, तस्माद्विधिरूपमेव। अतो वा तत्सिद्धिः—ग्रामाऽऽरामादयः पदार्थाः प्रतिभासान्तःप्रविष्टाः, प्रतिभासमानत्वात्। यत्प्रतिभासते तत्प्रतिभासान्तःप्रविष्टमेव, यथा प्रतिभासस्वरूपम्। प्रतिभासन्ते च ग्रामाऽऽरामादयः पदार्थाः, तस्मात्प्रतिभासान्तःप्रविष्टाः। आगमोऽपि तदावेदकः समुपलभ्यते—'पुरुष एवेदं सर्वं यद्भूतं यच्च भाव्यम्' [ऋक्सं० म० १०, सू० ९०, ऋ० २] इति। 'श्रोतव्योऽयमात्मा निदिध्यासितव्योऽनुमन्तव्यः'¹ [बृहदा० २-४-५] इत्यादिवेदवाक्यैरपि तत्सिद्धेः कृत्रिमेणाप्याऽऽगमेन तस्यैव प्रतिपादनात्[2]। उक्तं च—

'सर्वं वै खल्विदं ब्रह्म' [छान्दोग्यो० ३।१४।१] 'नेह नानाऽस्ति किञ्चन।' [बृहदा० ४-४-१]।

'आरामं तस्य पश्यन्ति न तत्पश्यति कश्चन॥' [बृहदा० ४-३-१४] इति।

---

१. पूर्णमुपनिषद्वाक्यमिदं "आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यो मैत्रेय्यात्मनि खल्वरे दृष्टे श्रुते मते विज्ञात इदं सर्वं विदितम्।"—बृहदा० २।४।५, ४।५।६।

1 'तेनैवं' पाठः। 2 'प्रतिपादकत्वात्'।

§ ४३. [किं च, अन्यतोऽपि अनुमान-] प्रमाणतस्तस्यैव सिद्धेः। परमपुरुष एक एव तत्त्वम्, सकलभेदानां तद्विवर्तत्वात्। तथा हि—सर्वे भावा ब्रह्मविवर्ताः सत्त्वैकरूपेणान्वितत्वात्। यद्यद्रूपेणान्वितं तत्तदात्मकमेव, यथा घट-घटी-शरावोदञ्चनादयः मृद्रूपेणैकेनान्वितत्वान्मृद्विवर्ताः, सत्त्वैकरूपेणान्वितं सकलं वस्त्विति सिद्धं ब्रह्मविवर्तत्वं निखिलभेदानामिति।

§ ४४. यदुच्यते, तत्सर्वं मदिरारसास्वादगद्गदोदितमिव मदनकोद्रवाद्युपयोगजनितव्यामोहमुग्धविलसितमिव निखिलमवभासते[1], विचारासहत्वात्। सर्वं हि वस्तु प्रमाणसिद्धं[2] वचसा किंचित्सिद्धिमधिवसति। अद्वैतमते प्रमाणमपि नास्ति। तत्सद्भावे द्वैतप्रसंगात्, अद्वैतसाधकस्य प्रमाणस्य द्वितीयस्य सद्भावात्।

§ ४४. अथ मतम्, लोकप्रत्यायनाय तदपेक्षया प्रमाणमभ्युपगम्यते, तदेतदतिशयेन बालविलसितम्, त्वन्मते लोकस्यैवासंभवात्। एकस्यैव नित्यनिरंशस्य परमब्रह्मण एव सद्भावात्। अथाऽस्तु यथाकथंचित्प्रमाणमपि, तत्किं प्रत्यक्षमनुमानमागमो वा तत्साधकं प्रमाणमुररीक्रियते। न तावत्प्रत्यक्षम्, तस्य समस्तवस्तुजातगतभेदस्यैव[3] प्रकाशकत्वाद्, अबला-बालगोपालानां तथैव प्रतिभासनात्।

§ ४५. यच्च निर्विकल्पकं प्रत्यक्षं तदावेदकमित्युक्तम्, तदपि न धीमद्धृतिकरम्, तस्य प्रामाण्यानभ्युपगमात्। सर्वस्यापि प्रमाणस्य[4] व्यवसायात्मकस्यैवाविसंवादकत्वेन प्रामाण्योपपत्तेः। सविकल्पकेन तु प्रत्यक्षेण प्रमाणभूतेन एकस्यैव विधिरूपस्य परमब्रह्मणः स्वप्नेऽप्यप्रतिभासनात्।

---

1. 'निखिलमेव भासति' पाठः। 2. 'प्रमाणसिद्धान्ते न हि वचस्तः' पाठः। 3. 'प्रकाशत्वावत्' पाठः। 4. 'प्रमाणत्वस्य' पाठः।

§४६. यदप्यभाणि, 'आहुर्विधातृ प्रत्यक्षम्' इत्यादि, तदपि न स्वेष्टमजनिष्ट शिष्टानामिति चिन्त्यताम्। प्रत्यक्षेण ह्यनुवृत्ति (त्त)-व्यावृत्ताकारात्मकवस्तुन एव[1] प्रकाशनात्। न ह्यनुस्यूतमेकमखण्डं सत्तामात्रं विशेषनिरपेक्षं सामान्यं प्रतिभासते, येन 'यदद्वैतं तत् ब्रह्मणो रूपम्' इत्याद्युक्तं शोभेत[2], विशेषनिरपेक्षस्य सामान्यस्य खरविषाणवदप्रतिभासनात्। तदुक्तम्—

निर्विशेषं हि सामान्यं भवेत्खरविषाणवत्।
सामान्यरहितत्वेन विशेषास्तद्वदेव हि॥
[मी० श्लो० आ० श्लो० १०]

§४७. ततः सिद्धः सामान्यविशेषात्माऽनयोः विषय इति, एकस्य परमब्रह्मण एव विषयत्वासिद्धेः।

§४८. यच्च 'प्रमेयत्वात्' इत्यनुमानमुक्तम्, तदप्येतेनैव निरस्तं बोद्धव्यम्, पक्षस्य प्रत्यक्षबाधितत्वेन हेतोः कालात्ययापदिष्टत्वात्। यच्च तत्सिद्धौ 'प्रतिभासमानत्वं साधनमुक्तम्, तदपि साधनाभासत्वेन न प्रकृतसाध्यसाधनायालमित्यकलङ्कमकलङ्कशासनमेव।

§४९. प्रतिभासमानत्वं हि निखिलभावानां स्वतः परतो वा, न तावत्स्वतः, घटपटादीनां स्वतः प्रतिभासमानत्वेनासिद्धत्वात्। परतः प्रतिभासमानत्वं हि परं विना नोपपद्यते, इति।

§ ५०. यच्च 'परमब्रह्मणो विवर्तवर्तित्वमखिलभेदानाम्' इत्युक्तम्, तदप्यन्वेत्रन्वीयमानद्वयाविनाभावित्वेन पुरुषाद्वैतं प्रतिबध्नात्येव। न च घटादीनां चैतन्यान्वयोऽप्यस्ति, मृदाद्यन्वयस्यैव तत्र दर्शनात्। ततो न किंचिदेतत्। अतोऽनुमानादपि न तत्सिद्धिः।

---

1. 'वस्तुन एकाशनात्' पाठः। 2. 'शोभते' पाठः।

§ ५१. किं च, पक्ष-हेतु-दृष्टान्ता अनुमानोपायभूताः परस्पर-भिन्ना अभिन्ना वा। भेदे, द्वैतसिद्धिः। अभेदे त्वेकरूपताऽऽपत्ति-स्तत्कथमेभ्योऽनुमानमात्मानमासादयति। यदि च हेतुमन्तरेणापि साध्यसिद्धिः स्यात्तर्हि द्वैतस्यापि वाङ्मात्रतः कथं न सिद्धिः। तदुक्तम्—

हेतोरद्वैतसिद्धिश्चेद् द्वैतं स्याद्धेतुसाध्ययोः।
हेतुना चेद्विना सिद्धिर्द्वैतं वाङ्मात्रतो न किम्॥
[आप्तमी० का० २६]

§ ५२. 'सर्वं वै खल्विदं ब्रह्म' इत्याद्यागमादपि न तत्सिद्धिः, तस्यापि द्वैताविनाभावित्वेनाद्वैतं प्रति प्रामाण्यासंभवात्। वाच्य-वाचकभावलक्षणस्य द्वैतस्य तत्रापि दर्शनात्। तदुक्तम्—

कर्म-द्वैतं फल-द्वैतं लोक-द्वैतं विरुध्यते।[1]
विद्याऽविद्याद्वयं न स्याद् बन्ध-मोक्षद्वयं तथा॥
[आप्तमी० का० २५]

ततः कथमागमादपि तत्सिद्धिस्ततो न पुरुषाद्वैतमेव प्रमाणस्य विषयः।

§ ५३. नाप्यनेकमेव तत्त्वं प्रमाणस्य विषयः, तस्यापि परस्परनिरपेक्षस्य केवलसमान्यस्य विशेषस्य वा, तद्द्वयस्य वा प्रमाणाविषयत्वेन प्राक्प्ररूपितत्वात्। तन्नानेकमेव तत्त्वं [अपि तु] परस्परसापेक्षमेकमनेकं च [तत्] [2]स्याद्वादिनामभीष्टमेव।

[इत्थं नाद्वैतं नापि द्वैतं प्रमाणस्य विषय इत्यभिधाय प्रदर्श्य च परस्परसापेक्षयोरेवैकानेकयोः प्रमाणविषयत्वमिति सप्तभङ्गीनयेन प्रदर्शयति—]

§ ५४. यतः स्यादेकम्, द्रव्यापेक्षया ॥१॥ स्यादनेकम्, पर्यायापेक्षया ॥२॥ स्यादेकानेकम्, क्रमेणोभयापेक्षया ॥३॥

1. 'च नो भवेत्' इत्याप्तमीमांसापाठः। 2. 'स्याद्वादवादिनाम्-'पाठः।

स्यादवक्तव्यम्, युगपद्द्रव्यपर्यायापेक्षया वक्तुमशक्यत्वात् ॥४॥ स्यादेकावक्तव्यम्, द्रव्यापेक्षत्वे सति युगपद्द्रव्यपर्यायापेक्षया वक्तुमशक्यत्वात् ॥५॥ स्यादनेकावक्तव्यम्, पर्यायापेक्षत्वे सति युगपद्द्रव्यपर्यायापेक्षया वक्तुमशक्यत्वात् ॥६॥ स्यादेकानेकावक्तव्यम्, क्रमार्पितद्रव्यपर्यायापेक्षत्वे सति युगपद्द्रव्यपर्यायापेक्षया वक्तुमशक्यत्वात् ॥७॥ इति सप्तभङ्गी

---

१ ननु केयं सप्तभङ्गी, इति चेत्, उच्यते, 'प्रश्नवशादेकत्र वस्तुन्यविरोधेन विधिप्रतिषेधकल्पना सप्तभङ्गी ।'—तत्त्वार्थवा० १-६ । न्यायविनिश्चयेऽपि श्रीमदकलङ्कदेवैरुक्तम्—

द्रव्यपर्यायसामान्यविशेषप्रविभागतः ।
स्याद्विधिप्रतिषेधाभ्यां सप्तभङ्गी प्रवर्तते ॥४५१॥

श्रीयशोविजयोऽप्याह—'एकत्र वस्तुन्येकैकधर्मपर्यनुयोगवशादविरोधेन व्यस्तयोः समस्तयोश्च विधिनिषेधयोः कल्पनया स्यात्काराङ्कितः सप्तधा वाक्प्रयोगः सप्तभङ्गी । इयं च सप्तभङ्गी वस्तुनि प्रतिपर्यायं सप्तविधधर्माणां सम्भवात् सप्तविधसंशयोत्थापितसप्तविधजिज्ञासामूलसप्तविधप्रश्नानुरोधादुपपद्यते ।'—जैनतर्कभा० पृ० १६ । 'ननु एकत्रापि जीवादिवस्तुनि विधीयमाननिषिध्यमानानन्तधर्मसद्भावात्तत्कल्पनाऽनन्तभङ्गी स्यात् (न तु सप्तभङ्गी), इति चेत्, न, अनन्तानामपि सप्तभङ्गीनामिष्टत्वात्, तत्रैकत्वानेकत्वादिकल्पनयापि सप्तानामेव भङ्गानामुपपत्तेः, प्रतिपाद्यप्रश्नानां तावतामेव संभवात्, प्रश्नवशादेव सप्तभङ्गीति नियमवचनात् । सप्तविध एव प्रश्नः कुत इति चेत्, सप्तविधजिज्ञासाघटनात् । साऽपि सप्तविधा कुत इति चेत्, सप्तधा संशयोत्पत्तेः । सप्तधैव संशयः कथमिति चेत्, तद्विषयवस्तुधर्मसप्तविधत्वात् ।'—अष्टस० पृ० १२५, १२६ । के ते वस्तुनिष्ठाः सप्तधर्मा इत्यत्रोच्यते—(१) सत्त्वम् (२) असत्त्वम्, (३) क्रमार्पि-

प्रमाणविषयतामियर्ति ।

[प्रमाणप्रमेयभेदात्प्रसिद्धातं द्विविधं तत्त्वं परीक्ष्याधुना तस्य वक्तव्यावक्तव्यतां परीक्षितुमुपक्रमते । तत्र 'तत्त्वं सकलविकल्पवागोचरातीतं (अवक्तव्यम्), केवलं निर्विकल्पकप्रत्यक्षगम्यम्' इति बौद्धानां पूर्वपक्षः प्रदर्श्यते—]

§ ५५. तत्त्वं सकलविकल्पवागोचरातीतं निर्विकल्पकस्वानुभवविषयस्वलक्षणरूपं प्रमाणविषयत्वेन जागर्त्ति । यतो विकल्पाः

तोभयं सत्त्वासत्त्वाख्यम्, (४) सहार्पितोभयमवक्तव्यत्वरूपम्, (५) सत्त्वसहितमवक्तव्यत्वम्, (६) असत्त्वसहितमवक्तव्यत्वम्, (७) सत्त्वासत्त्वविशिष्टमवक्तव्यत्वम् इति । न्यायदीपिकाकारोऽपि एतदेव प्रतिपादयति—'द्रव्यार्थिकनयाभिप्रायेण सुवर्णं स्यादेकमेव, पर्यायार्थिकनयाभिप्रायेण स्यादनेकमेव, क्रमेणोभयनयाभिप्रायेण स्यादेकमनेकं च, युगपदुभयाभिप्रायेण स्यादवक्तव्यम्, युगपत्प्राप्तेन नयद्वयेन विविक्तस्वरूपयोरेकत्वानेकत्वयोर्विमर्शासंभवात् । न हि युगपदुपनतेन शब्दद्वयेन घटस्य प्रधानभूतयो रूपवत्त्वरसवत्त्वयोर्विविक्तरूपयोः प्रतिपादनं शक्यम् । अवक्तव्यस्वरूपं तत्तदभिप्रायैरुपनतेनैकत्वादिना समुचितं स्यादेकमवक्तव्यम्, स्यादनेकमवक्तव्यम्, स्यादेकानेकमवक्तव्यमिति स्यात् । सैषा नयविनियोगपरिपाटी सप्तभङ्गीति उच्यते । भङ्गशब्दस्य वस्तुस्वरूपभेदवाचकत्वात् । सप्तानां भङ्गानां समाहारः सप्तभङ्गीति सिद्धेः ।'–न्या० दी० पृ० १२६–१२७ ।

१. बौद्धः शङ्कते—तत्त्वमिति । अस्याः शङ्काया अयं भावः—यत् तत्त्वं स्वलक्षणम्, तच्च निर्विकल्पकं परमार्थसच्च तदेव च प्रमाणविषयम् । विकल्पास्तु अवस्तुनिर्भासिकाः तेषां नामसंश्रयत्वेन शब्दोत्पन्नत्वात् । शब्दानां चार्थैः सम्बन्धासम्भवात् न स्वलक्षणरूपं तत्त्वं तैर्विषयीक्रियते, अपि तु निर्विकल्पकप्रत्यक्षविषयं तत् । तत्कुतः सामान्यविशेषात्माऽर्थः प्रमाणस्य विषय इति ।

सर्वेऽपि भावाभावाद्या न वास्तवस्वलक्षणविषयास्तेषामन्यथावृत्तिरूपतयाऽवस्तुनिर्भासमानत्वात्। विकल्पो हि नामसंश्रयो न वस्त्ववलम्बनः। न हि नाम कस्यचित्पदार्थस्य धर्मस्तस्य संज्ञामात्रतया संव्यवहर्तृभिर्व्यवहरणात्। 'अतद्गुणे वस्तुनि संज्ञाकर्म नाम' [ ] इति भवद्भिरप्यङ्गीकरणात्। उक्तं च—'अभिलापसंसर्गवती प्रतीतिः कल्पना' [न्या० वि० पृ० १०]। न हि शब्दोऽर्थधर्मः, शब्दार्थयोः संबन्धाभावात्।

[जैनाः तत्समालोचयन्तः प्राहुः—]

§ ४६. तत्[1] कल्पितमवकल्प्यते, शब्दार्थयोर्वाच्यवाचकसंबन्धसद्भावात्सहजयोग्यतासङ्केतवशाद्धि शब्दोऽर्थे धियमाविर्भावयति। न च विकल्पो नामसंश्रय एव, शब्दानुच्चारणेऽपि निश्चयात्मकविज्ञानादेव यथावस्थितार्थप्रतिपत्ति-प्रवृत्ति-प्राप्तिदर्शनात्। तन्न सकलविकल्पविकलं तत्त्वमित्यकलङ्कशासनम्। तथा चोक्तम्—

तत्त्वं विशुद्धं सकलैर्विकल्पैर्विश्वाभिलापास्पदतामतीतम्।
न [1]स्वात्मवेद्यं न च तन्निगद्यं सुषुप्त्यवस्थं भवदुक्तिबाह्यम्॥
[युक्त्यनु०का० १६]

१. जैन उत्तरयति—तत् कल्पितमवकल्प्यते इति। अस्यायं भावः—भवता यदुक्तं तत् कल्पनामात्रम्। यतो हि शब्दार्थयोर्वाच्यवाचकसम्बन्धसद्भावात् सहजयोग्यतासङ्केतवशाच्छब्दो अर्थे ज्ञानं करोत्येव। न च विकल्पाः शब्दजा एव, शब्दोच्चारणाभावेऽपि तेषां मानसविकल्पानां व्यवसायात्मकज्ञानरूपाणां समुद्भवात्। तेषां च सामान्यविशेषात्मार्थ एव विषय इत्यकलङ्कमेवाकलङ्कशासनम्।

1. 'स्वस्य वेद्यं' इति युक्त्यनुशासने पाठः।

§४७. तदेतत्[1] किंचित्प्रमाणविषयभूतोऽर्थः सामान्यविशेषात्मको भावाभावात्मको नित्यानित्यात्मकः। किं बहुना। अभेद-भेदाद्यनेकधर्मात्मकः [अपि]। प्रमेयत्वस्यान्यथानुपपत्तेः। यस्तु सामान्यविशेषाद्यनेकधर्मात्मको नास्ति स प्रमेयार्थो न भवति। यथा खरविषाणम्। प्रमेयार्थश्चायम्। तस्मात्सामान्यविशेषाद्यनेकधर्मात्मकः। तदुक्तम्—

अभेद-भेदात्मकमर्थतत्त्वं तव स्वतन्त्राऽन्यतरत्ख-पुष्पम्।
अवृत्तिमत्त्वात्समवायवृत्तेः संसर्गहानेः सकलार्थ-हानिः॥
[युक्त्यनु० का० ४]

तथा हि—
भावेषु नित्येषु विकार-हानेर्न कारक-व्यापृ[2]त-कार्य-युक्तिः।
न बन्ध-भोगौ[3] न च तद्विमोक्षः समन्त-दोषं [4]मतमन्यदीयम्॥
[युक्त्यनु० का० ८]

तथा च—
[5]क्षणिकैकान्तपक्षेऽपि दृष्टो भेदो विरुध्यते।
कारकाणां क्रियायाश्च नैकं स्वस्मात्प्रजायते॥
[आप्तमी० का० २४]

उक्तं च—
दया-दम-त्याग-समाधि-निष्ठं नय-प्रमाण-प्रकृताञ्जसाऽर्थम्।
अधृष्यमन्यैः [6]सकलैः प्रवादैर्जिन! त्वदीयं मतमद्वितीयम्॥
[युक्त्यनु० का० ६]

1. 'तदेतन्न' द पाठः। 2. 'व्यावृत' द पाठः। 3. 'भोग्यौ' पाठः। 4. 'द्वितीयम्' द पाठः। 5. 'अद्वैतैकान्तपक्षेऽपि' इत्ययं पाठ आप्तमीमांसायाम्। 6. 'निखिलैः' इति पाठो युक्त्यनुशासने।

§ ५८. ननु यद्येवं कथमेकाधिपत्यं न भवतीति चेत्, इत्यत्राप्युक्तं समन्तभद्राचार्यैः—

काल: कलिर्वा कलुपाऽऽशयो वा श्रोतुः प्रवक्तुर्वचनाऽनयो वा ।
त्वच्छासनैकाधिपतित्वलक्ष्मी-प्रभुत्वशक्तेरपवाद-हेतुः ॥

[युक्त्यनु० का० ४]

[इति प्रमेयतत्त्व-परीक्षा]

इति श्रीनरेन्द्रसेनविरचिता प्रमाणप्रमेयकलिका समाप्ता[1]।



---

१. द प्रतौ पाठः—'लिपिस्कृत-शुभचिन्नक-लेखक-दयाचन्दम्हातमा: (महात्मा) शुभमस्तु । मिति भादवा प्रथम 'शुक्लपक्षे चठि ६. रिविवासरे संवत् १८७१ का' ॥ इति लेखकप्रशस्तिः ॥ आ प्रतावपि अयमेव पाठः । सेयं प्रतिः द प्रतेरेव प्रतिलिपिः । यतोऽस्या आ प्रतेरन्ते लिखितम्—'उक्त प्रति नया मन्दिर धर्मपुरा देहलीसे मँगवाकर श्री जैन सिद्धान्त-भवन आराके लिए संग्रहार्थ श्रीमान् पं० के० भुजवली शास्त्रीकी अध्यक्षतामें यह प्रतिलिपि की गई । इति शुभमस्तु ॥ शुभमिति मार्गशीर्षशुक्ला द्वादशी १२. चन्द्रवार विक्रमसंवत् १९९१ हस्ताक्षर रोशनलाल जैन इति ॥'

प्रमाणप्रमेयकलिकायाः

परिशिष्टानि

बालानां हितकामिनामतिमहापापैः पुरोपार्जितैः,
माहात्म्यात्तमसः स्वयं कलिबलात्प्रायो गुणद्वेषिभिः।
न्यायोऽयं मलिनीकृतः कथमपि प्रक्षाल्य नेनीयते,
सम्यग्ज्ञानजलैर्वचोभिरमलं तत्रानुकम्पापरैः॥

—श्रीमद्भट्टाकलङ्कदेवः, न्यायविनिश्चये।

•

१. प्रमाणप्रमेयकलिका-गतावतरणानि

२. प्रमाणप्रमेयकलिकायां निर्दिष्टा न्यायाः

३. प्रमाणप्रमेयकलिका-गत-निदर्शनवाक्यानि

४. प्रमाणप्रमेयकलिकाऽन्तर्गत-विशिष्ट-शब्दाः

५. प्रमाणप्रमेयकलिका-गत-दार्शनिक-लाक्षणिक-शब्दाः